# 【 खण्ड : 'ख' 】

# संस्कृत दिग्दर्शिका

## प्रथमः पाठः — वन्दना

विश्वानि देव सवितर्दुरितानि परासुव,
यद् भद्रं तन्न आसुव।।१।।

ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्,
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम्।।२।।

सह नाववतु, सह नौ भुनक्तु, सह वीर्यं करवावहै,
तेजस्वि नावधीतमस्तु, मा विद्विषावहै।।३।।

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।।४।।

यतो यतः समीहसे ततो नो अभयं कुरु,
शन्नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः।।५।।

## अभ्यास प्रश्न

### ➡ लघु उत्तरीय प्रश्न

१. वन्दनायाः प्रथमे मन्त्रे का प्रार्थना कृता?

२. जगति मानवः कथं वसेत्?

३. वयं कथं जीवनम् यापयेम्?

४. पञ्चमे मन्त्रे का प्रार्थना कृता?

५. अस्मभ्यम् प्रजाभ्य: पशुभ्य: च ईश किम् ददातु?

## ➡ अनुवादात्मक प्रश्न

१. **निम्नलिखित श्लोकों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) विश्वानि ...................................... आसुव।

(ख) ईशावास्यमिदं .................................. धनम्।

(ग) यतो यत: .................................. पशुभ्य:।

२. **निम्नलिखित सूक्तिपरक वाक्यों की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) मा विद्विषावहै।

(ख) विश्वानिदेव सवितर्दुरितानि परासुव।

(ग) मा गृध: कस्य स्विद धनम्।

(घ) तेन त्यक्तेन भुञ्जीथा मा गृध: कस्य स्विद् धनम्।

(ङ) सह नाववतु, सह नौ भुनक्तु, सह वीर्यं करवावहै।

(च) उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।

(छ) ईशावास्यमिदं सर्वं।

३. **निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) ईश्वर का सदा ध्यान करना चाहिए।

(ख) किसी के धन का लोभ न करो।

(ग) आलस्य में अपना बहुमूल्य समय न व्यतीत करो।

## ➡ व्याकरणात्मक प्रश्न

१. **शन्न:, तन्त्र में सन्धि-विच्छेद कीजिए।**

२. **निम्नलिखित शब्दों में विभक्ति एवं वचन बताइए–**

कस्य, विश्वानि, पशुभ्य:।

## शब्दार्थ

**विश्वानि** = सम्पूर्ण। **दुरितानि** = पाप। **परासुव** = दूर कीजिए। **भद्रं** = कल्याणकारी। **आसुव** = प्रदान कीजिए। **ईशावास्यम्** = ईश्वर से व्याप्त है। **तेन** = इस कारण से। **त्यक्तेन** = त्यागपूर्वक। **भुञ्जीथा:** = भोग करो। **मा गृध:** = लोभ या लालच न करो। **कस्य स्वित्** = किसका है। **शन्न:** = शं + न: (**शं** = कल्याण, **न:** = हमारा।)। **प्रजाभ्य:** = प्रजाओं (सन्तान) का। **पशुभ्य:** = पशुओं से।

●●

# द्वितीयः पाठः

# प्रयागः

भारतवर्षस्य उत्तरप्रदेशराज्ये प्रयागस्य विशिष्टं स्थानमस्ति। अत्र ब्रह्मणः प्रकृष्टयागकरणात् अस्य नाम प्रयागः अभवत्। गङ्गा-यमुनयोः संगमे सितासितजले स्नात्वा जनाः विगतकल्मषा भवन्ति इति जनानां विश्वासः। अमायां पौर्णमास्यां संक्रान्तौ च स्नानार्थिनामत्र महान् सम्मर्दः भवति। प्रतिवर्षं मकरं गते सूर्ये माघमासे तु अनेकलक्षाः जनाः अत्र आयान्ति मासमेकमुषित्वा च संगमस्य पवित्रेण जलेन, विदुषां महात्मनामुपदेशामृतेन च आत्मानं पावयन्ति। अस्मिन्नेव पर्वणि महाराजः श्रीहर्षः प्रतिपञ्चवर्षम् अत्रागत्य सर्वस्वमेव याचकेभ्यो दत्त्वा मेघ इव पुनः सञ्चयार्थं स्वराजधानीं प्रत्यगच्छत्।

ऋषेः भरद्वाजस्य आश्रमः अपि अत्रैव अस्ति, यत्र पुरा दशसहस्रमिताः विद्यार्थिनः अधीतिनः आसन्। पितुः आज्ञां पालयन् पुरुषोत्तमः श्रीरामः अयोध्यायाः वनं गच्छन् 'कुत्र मया वस्तव्यम्' इति प्रष्टुम् अत्रैव भरद्वाजस्य समीपम् आगतः। चित्रकूटमेव त्वन्निवासयोग्यम् उचितं स्थानम् इति तेनादिष्टः रामः, सीतया लक्ष्मणेन च सह चित्रकूटम् अगच्छत्।

पुरा वत्सनामकमेकं समृद्धं राज्यमासीत्। अस्य राजधानी कौशाम्बी इतः नातिदूरेऽवर्तत। अस्य राज्यस्य शासकः महाराजः उदयनः वीरः अप्रतिमसुन्दरः ललितकलाभिज्ञश्चासीत्। यमुनातटे आधुनिक-'सुजावन'–ग्रामे तस्य सुयामुनप्रासादस्य ध्वंसावशेषाः तस्य सौन्दर्यानुरागं ख्यापयन्ति। प्रियदर्शी सम्राट् अशोकः कौशाम्ब्यामेव स्वशिलालेखमकारयत् योऽधुना कौशाम्ब्याः आनीय प्रयागस्य दुर्गे सुरक्षितः।

गङ्गायाः पूर्वं पुराणप्रसिद्धस्य महाराजस्य पुरुरवसः राजधानी प्रतिष्ठानपुरम् झूँसीत्याधुनिकनाम्ना प्रसिद्धमस्ति। यस्य प्रतिष्ठा अद्यापि विदुषां महात्मनाञ्च स्थित्या अक्षुण्णैव।

इतिहासप्रसिद्धः नीतिनिपुणः मुगलशासकः अकबरनामा दिल्ल्याः सुदूरे पूर्वस्यां दिशि- स्थितयोः कड़ाजौनपुरनामकयोः समृद्धयोः राज्ययोः निरीक्षणं दुष्करं विज्ञाय तयोर्मध्ये प्रयागे गङ्गायमुनाभ्यां परिवृतं दृढं दुर्गमकारयत् गङ्गाप्रवाहाच्चास्य रक्षणाय विशालं बन्धमप्यकारयत्, योऽद्यापि नगरस्य गङ्गायाश्च मध्ये सीमा इव स्थितोऽस्ति। अयमेव प्रयागस्य नाम स्वकीयस्य 'इलाही' धर्मस्यानुसारेण 'इलाहाबाद' इत्यकरोत्। इदं दुर्गमतीव विशालं सुदृढं सुरक्षादृष्ट्या च अतिमहत्त्वपूर्णमस्ति।

भारतस्य स्वतन्त्रतान्दोलनस्य इदं नगरं प्रधानकेन्द्रम् आसीत्। श्रीमोतीलालनेहरू, महामना मदनमोहनमालवीय, आजादोपनामकश्चन्द्रशेखरः, अन्ये च स्वतन्त्रतासंग्रामसैनिकाः अस्यामेव पावनभूमौ उषित्वा आन्दोलनस्य सञ्चालनम् अकुर्वन्। राष्ट्रनायकस्य पण्डितजवाहरलालस्य इयं क्रीड़ास्थली कर्मभूमिश्च।

राष्ट्रभाषा-हिन्दी-प्रचारे संलग्नं हिन्दीसाहित्यसम्मेलनम् अत्रस्थितम् अत्रैव च अनेकसहस्रसंख्यैः देशविदेशविद्यार्थिभिः परिवृतः विविधविद्यापारङ्गतैः विद्वद्वरेण्यैः उपशोभितः च प्रयागविश्वविद्यालयः भरद्वाजस्य प्राचीन-गुरुकुलस्य नवीनं रूपमिव शोभते। स्वतन्त्रेऽस्मिन् भारते प्रत्येकं नागरिकाणां न्यायप्राप्तेरधिकारघोषणामिव कुर्वन् उच्चन्यायालयः अस्य नगरस्य प्रतिष्ठां वर्द्धयति।

एवं गङ्गा-यमुना-सरस्वतीनां पवित्रसङ्गमे स्थितस्य भारतीयसंस्कृतेः केन्द्रस्य च महिमानं वर्णयन् महाकविः कालिदासः सत्यमेव अकथयत्–

**समुद्रपत्न्योर्जलसन्निपाते**
**पूतात्मनामत्र किलाभिषेकात्।**
**तत्त्वावबोधेन विनापि भूयस्-**
**तनुत्यजां नास्ति शरीरबन्धः।।**

# अभ्यास प्रश्न

## ➡ लघु उत्तरीय प्रश्न

१. प्रयागः कस्मिन् राज्ये वर्तते?
२. ऋषेः भरद्वाजस्य आश्रमः कुत्रास्ति?
३. रामः सीतया लक्ष्मणेन च सह कुत्र अगच्छत्?
४. वत्स-राज्यस्य राजधानी का आसीत्?
५. उदयनस्य राजधानी का आसीत्?
६. प्रयागे कयोः नद्योः सङ्गमः अस्ति?
७. "कुत्र मया वस्तव्यम्" इति प्रष्टुम् श्रीरामः कस्य समीपम् आगतः?
८. हिन्दीसाहित्यसम्मेलनं कुत्र वर्तते (स्थितम्)?
९. झूँसीत्याधुनिक नाम्ना प्रसिद्धं पुरा किं नगरं कुत्र च आसीत्?
१०. भारतस्य स्वातन्त्र्यान्दोलनस्य प्रधानकेन्द्रं किम् नगरमभूत?
११. उत्तरप्रदेशस्य उच्चन्यायालयः कुत्र अस्ति?
१२. प्रतिष्ठानपुरम् वर्तमाने केन नाम्ना प्रसिद्धम् अस्ति?
१३. प्रयागे स्नानार्थिनां महान् सम्मर्दः कदा भवति?
१४. कस्य राज्यस्य शासकः उदयनः आसीत्?
१५. प्रयागस्य नाम 'प्रयागः' कथम् अभवत्?
१६. सम्राट अशोकः स्वशिलालेखं कुत्र अकारयत्?
१७. गङ्गा-यमुनयोः संगमः कुत्र अस्ति?
१८. प्रयागस्य नाम 'इलाहाबाद' इति कः अकरोत्?

## ➡ अनुवादात्मक प्रश्न

१. **निम्नलिखित अनुच्छेदों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) राष्ट्रभाषा-हिन्दी-प्रचारे .................प्रतिष्ठां वर्द्धयति।
(ख) ऋषेः भरद्वाजस्य ............................... अगच्छत्।
(ग) भारतवर्षस्य उत्तरप्रदेशराज्ये ................ प्रत्यगच्छत्।
अथवा भारतवर्षस्य ..................................... पावयन्ति।

अथवा अत्र ब्राह्मणः ..........................आत्मानं पावयन्ति।

(घ) पुरा वत्सनामकमेकं........................... ख्यापयन्ति।

(ङ) इतिहासप्रसिद्धः ..................... अतिमहत्त्वपूर्णमस्ति।

(च) समुद्रपत्न्योर्जलसन्निपाते...................... शरीरबन्धः।

(छ) भारतस्य...................................... कर्मभूमिश्च।

(ज) राष्ट्रभाषा-हिन्दी.................................. वर्द्धयति।

अथवा राष्ट्रभाषा ............................................ शोभते।

२. **निम्नलिखित सूक्तिपरक पंक्ति की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) "तत्त्वावबोधेन विनापि भूयसतनुत्यजां नास्ति शरीरबन्धः।"

(ख) तनुत्यजां नास्ति शरीरबन्धः।

३. **निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) प्रयाग उत्तर प्रदेश राज्य में है।

(ख) यहाँ पर भरद्वाज का आश्रम है।

(ग) पुरुषोत्तम राम यहाँ आये थे।

(घ) प्रयाग में गङ्गा और यमुना का सङ्गम है।

(ङ) चन्द्रशेखर का उपनाम 'आजाद' था।

## ➡ व्याकरणात्मक प्रश्न

१. **निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए–**

तेनादिष्टः, झूँसीत्याधुनिक, नातिदूरे, योऽधुना।

२. **गङ्गायमुनयोः** तथा **सितासितौ** में विग्रह सहित समास बताइए।

## शब्दार्थ

**ब्रह्मणः** = ब्रह्मा के द्वारा। **प्रकृष्टयागकरणात्** = श्रेष्ठ यज्ञ करने के कारण। **सितासितजले** = श्वेत और श्याम जल में। **विगतकल्मषाः** = पापरहित। **सम्मर्दः** = भीड़। **पूतात्मनाम्** = पवित्र आत्मावाले। **अभिषेक** = स्नान। **कड़ा** = कौशाम्बी जनपद में पश्चिम की ओर गंगा तट पर स्थित एक स्थान जो मुगलकाल में एक सम्पन्न राज्य था। **पुरुरवा** = एक पौराणिक महान् राजा। **परिवृतः** = घिरा हुआ, युक्त। **विद्वद्वरेण्यैः** = श्रेष्ठ विद्वानों से। **समुद्रपत्न्योः** = समुद्र की दोनों पत्नियों अर्थात् गंगा और यमुना के। **भूयः** = पुनः। **तनुत्यजां** = शरीर त्याग करनेवाले।

## तृतीयः पाठः

# सदाचारोपदेशः

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना: उपासते।।१।।

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।२।।

मधुमन्मे निष्क्रमणं मधुमन्मे परायणम्।
वाचा वदामि मधुमद् भूयासं मधुसदृशः।।३।।

आचाराल्लभते ह्यायुराचाराल्लभते श्रियम्।
आचारात् कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च।।४।।

ये नास्तिकाः निष्क्रियाश्च गुरुशास्त्रातिलङ्घिनः।
अधर्मज्ञा दुराचारास्ते भवन्ति गतायुषः।।५।।

ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत्।
उत्थायाचम्य तिष्ठेत पूर्वां सन्ध्यां कृताञ्जलिः।।६।।

अक्रोधनः सत्यवादी भूतानामविहिंसकः।
अनुसूयुरजिह्मश्च शतं वर्षाणि जीवति।।७।।

अकीर्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम् ।।८।।

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशो बलम्।।९।।

वृत्तं यत्नेन संरक्षेद् वित्तमायाति याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।।१०।।

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते।।११।।

श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।।१२।।

(संकलित)

# अभ्यास प्रश्न

## ➡ लघु उत्तरीय प्रश्न

१. विद्या केन रक्ष्यते?
२. धर्मः केन रक्ष्यते?
३. धर्मस्य सर्वस्वं किमस्ति?
४. कः शतं वर्षाणि जीवति?
५. अकीर्तिम् कः हन्ति?
६. अभिवादनशीलस्य कानि वर्द्धन्ते?
७. के पुरुषाः गतायुषः भवन्ति?
८. सदाचारस्य किं महत्वम्?
९. मनुष्यः आचारात् किं किं लभते?
१०. कुलं केन रक्ष्यते?

## ➡ अनुवादात्मक प्रश्न

**१. निम्नलिखित श्लोकों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) संगच्छध्वं ............................................ उपासते।
(ख) श्रूयतां ............................................ समाचरेत्।
(ग) आचाराल्लभते ............................... प्रेत्य चेह च।
(घ) ब्राह्मे मुहूर्त्ते .................................... कृताञ्जलिः।
(ङ) अभिवादनशीलस्य ............................. यशोबलम्।
(च) वृत्तं यत्नेन ..........................................हतोहतः।
(छ) अक्रोधनः .............................................जीवति।
(ज) अकीर्तिं विनयो .............................. हन्त्यलक्षणम्।
(झ) सत्येन रक्ष्यते ................................ वृत्तेन रक्ष्यते।
(ञ) ये नास्तिकाः ...................................... गतायुषः।
(ट) मधुमन्मे ..........................................मधुसदृशः।
(ठ) कुर्वन्नेवेह कर्माणि ........................कर्म लिप्यते नरे।

**२. निम्नलिखित सूक्तिपरक वाक्यों की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) वृत्ततस्तु हतो हतः।
(ख) मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते।
(ग) आत्मनः प्रतिकूलानि परेषां न समाचरेत्।
(घ) विद्या योगेन रक्ष्यते।

(ङ) आचारात् कीर्तिमाप्नोति।
(च) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
(छ) आचाराल्लभते ह्यायुराचाराल्लभते श्रियम्।
(ज) सत्येन रक्ष्यते धर्मः।
(झ) आचारो हन्त्य लक्षणम्।
(ञ) वृत्तं यत्नेन संरक्षेद्।
(ट) अधर्मज्ञा दुराचारास्ते भवन्ति गतायुषः।
(ठ) सं गच्छध्वं संबदध्वं सं वो मनांसि जानताम्।

३. **निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए—**
(क) सदाचार से मनुष्य आयु प्राप्त करता है।
(ख) मनुष्य को ब्राह्ममुहूर्त में उठना चाहिए।
(ग) चरित्र की यत्नपूर्वक रक्षा करनी चाहिए।
(घ) सत्य से धर्म की रक्षा होती है।

## ➡ व्याकरणात्मक प्रश्न

१. **धर्मार्थौ** एवं **महापुरुषः** में विग्रह सहित समास बताइए।
२. **निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए—**
ह्यायुः, धर्मार्थौ, वृद्धोपसेविनः।

## शब्दार्थ

**संगच्छध्वम्** = साथ-साथ चलो। **संवदध्वम्** = साथ-साथ बोलो। **सं वो मनांसि जानताम्** = (वः मनांसि सञ्जानताम्) **वः** = अपने। **मनांसि** = मनों को। **सञ्जानताम्** = मिलकर जानो। **एवं** = इस प्रकार। **वाचा** = वाणी से। **उपासते** = पूजा करते थे। **जिजीविषेत्** = जीने की इच्छा करनी चाहिए। **शतं समाः** = सौ वर्ष। **मधुमद्** = मधुर। **निष्क्रमणं** = प्रवृत्ति। **परायणम्** = निवृत्ति। **प्रेत्य** = मृत्यु के पश्चात् परलोक में। **इह** = इस लोक में। **अनुसूयुः** = निन्दा न करनेवाला। **गतायुषः** = मृत (मरे हुए)। **अक्रोधनः** = क्रोध न करनेवाला। **अजिह्म (ऋजु)** = जो कुटिल न हो। **अलक्षणम्** = बुराई। **वृत्तम्** = चरित्र। **मृजया** = स्वच्छता या सफाई से। **वृत्तेन** = सदाचार से। **श्रूयताम्** = सुनो। **धर्मसर्वस्वम्** = धर्म का सार। **अवधार्यताम्** = धारण करो।

●●

## चतुर्थः पाठः

# हिमालयः

भारतदेशस्य सुविस्तृतायाम् उत्तरस्यां दिशि स्थितो गिरिः पर्वतराजो हिमालय इति नाम्नाभिधीयते जनैः। अस्य महोच्चानि शिखराणि जगतः सर्वानपि पर्वतान् जयन्ति। अतएव लोका एनं पर्वतराजं कथयन्ति। अस्योन्नतानि शिखराणि सदैव हिमैः आच्छादितानि तिष्ठन्ति। अत एवास्य हिमालय इति हिमगिरिरित्यपि च नाम सुप्रसिद्धम्। 'एवरेस्ट', 'गौरीशङ्कर' प्रभृतीनि अस्य शिखराणि जगति उन्नततमानि सन्ति। अस्य अधित्यकायां त्रिविष्टप-नयपाल-भूतान-देशाः पूर्णसत्तासम्पन्नाः,कश्मीरहिमाचलप्रदेशासम-सिक्किम-मणिपुरप्रभृतयाः भारतीयाः प्रदेशाः सन्ति। उत्तरभारतस्य पर्वतीयो भागोऽपि हिमालयस्यैव प्रान्तरे तिष्ठति।

अयं पर्वतराजः भारतवर्षस्य उत्तरसीम्नि स्थितः तत् प्रहरीव शत्रुभ्यः सततं रक्षति। हिमालयादेव समुद्गम्य गङ्गा-सिन्धु-ब्रह्मपुत्राख्याः महानद्यः, शतद्रि-विपाशा-यमुना-सरयू-गण्डकी-नारायणीकौशिकीप्रभृतयः नद्यश्च समस्तामपि उत्तरभारतभुवं स्वकीयैः तीर्थोदकैः न केवलं पुनन्ति अपितु इमां शस्यश्यामलामपि कुर्वन्ति।

अस्योपत्यकासु सुदीर्घाः वनराजयो विराजन्ते, यत्र विविधाः ओषधयो वनस्पतयस्तरवश्च तिष्ठन्ति। इमाः ओषधयः जनान् आमयेभ्यो रक्षन्ति, तरवश्च आसन्द्यादिगृहोपकरणनिर्माणार्थं प्रयुज्यन्ते। हिमालयः वर्षर्तौ दक्षिणसमुद्रेभ्यः समुत्थिता मेघमाला अवरुध्य वर्षणाय ताः प्रवर्तयति।

अस्योपत्यकायां विद्यमानः कश्मीरो देशः स्वकीयाभिः सुषमाभिः भूस्वर्ग इति संज्ञया अभिहितो भवति लोके, ततश्च पूर्वस्यां दिशि स्थितः किन्नर-देशो देवभूमिनाम्ना प्राचीनसाहित्ये प्रसिद्धः आसीत्। अद्यापि 'कुलूघाटी' इति नाम्ना प्रसिद्धोऽयं प्रदेशः रमणीयतया केषां मनो न हरति। शिमला-देहरादून-मसूरी-नैनीताल-प्रभृतीनि नगराणि देशस्य सम्पन्नान् जनान् ग्रीष्मर्तौ बलादिव भ्रमणाय आकर्षन्ति। एभ्योऽपि पूर्वस्मिन् भागेऽवस्थितः रमणीयतमः प्रदेशः कामरूपतया 'कामरूप' इति संज्ञया अभिधीयते।

अस्यैव कन्दरासु तपस्यन्तः अनेके ऋषयो मुनयश्च परां सिद्धिं प्राप्तवन्तः। अस्य सिद्धिमत्वं विलोक्यैव 'उपह्वरे गिरीणां संगमे च नदीनां धिया विप्रोऽजायत' इत्यादि कथयन्तः वैदिका ऋषयः अस्य महत्त्वं स्वीकृतवन्तः। पुराणेषु सर्वविधानां सिद्धीनां प्रदातुः शिवस्य स्थानम् अस्यैव पर्वतस्य कैलासशिखरे स्वीकृतमस्ति। अस्यैव प्रदेशेषु बदरीनाथ-केदारनाथ-पशुपतिनाथ-हरिद्वार-हृषीकेश-वैष्णवदेवी-ज्वालादेवीप्रभृतीनि तीर्थस्थानानि सन्ति।

अतएव पर्वतराजोऽयं हिमालयः रक्षकतया, पालकतया, सर्वौषधिभिः संरक्षकतया, सर्वसिद्धिप्रदातृतया च भारतीयेषु जनेषु सुतरां समादृतः पर्वतराजः इति।

## अभ्यास प्रश्न

### ➡ लघु उत्तरीय प्रश्न

१. कस्य शिखराणि सदैव हिमैः आच्छादितानि सन्ति?
२. हिमालय पर्वतः भारतदेशस्य कस्यां दिशि वर्तते?
३. हिमालयस्य सर्वोच्च पर्वतशिखरस्य किं नाम?
४. हिमालयस्य कानि शिखराणि सर्वोच्चानि सन्ति?
५. कस्य कन्दरासु मुनयः सिद्धिं प्राप्तवन्तः?
६. हिमालयात् काः काः नद्यः निःसरन्ति?
७. हिमालयस्य उपत्यकायां के प्रदेशाः सन्ति?
८. कस्य पर्वतराजस्य शिखराणि सर्वानपि पर्वतान् जयन्ति?
९. कः देशः 'भू-स्वर्गः' इति संज्ञया अभिहितो भवति?

१०. हिमालये कानि-कानि नगराणि सन्ति?
११. कस्य उपत्यकासु सुदीर्घा: वनराजयो विराजन्ते?
१२. कस्य शोभा पर्यटकानां हृदयं मोहयति?
१३. कस्य उपत्यकायां कश्मीरो प्रदेश: विद्यते?
१४. हिमालय: प्रहरीव शत्रुभ्य: कं रक्षति?
१५. 'कुलूघाटी' प्रदेशस्य प्राचीनसाहित्ये किं नाम आसीत्?
१६. हिमालयस्योपत्यकासु के विराजन्ते?
१७. कश्मीरो देश: कस्योपत्यकायां विद्यमान: अस्ति।
१८. हिमालयप्रदेशेषु कानि तीर्थस्थानानि सन्ति?

## ➡ अनुवादात्मक प्रश्न

**१. निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए—**
(क) भारतदेशस्य ............................ उन्नततमानि सन्ति।
(ख) अयं पर्वतराज: .................................... कुर्वन्ति।
(ग) अस्योपत्यकासु ................................. प्रवर्तयति।
(घ) अस्योपत्यकायां ................................. आकर्षन्ति।
(ङ) अस्यैव कन्दरासु .................................... सन्ति।

**२. निम्न सूक्तिपरक पंक्ति की ससन्दर्भ हिन्दी-व्याख्या कीजिए—**
"उपह्वरे गिरीणां संगमे च नदीनां धिया विप्रोऽजायत"

**३. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए—**
(क) भारत की उत्तर सीमा में हिमालय पर्वत है।
(ख) हिमालय के ऊँचे शिखर सर्वदा बर्फ से ढके रहते हैं।
(ग) हिमालय से गंगा, यमुना, ब्रह्मपुत्र आदि नदियाँ निकलती हैं।
(घ) हिमालय भारतवर्ष की रक्षा करता है।
(ङ) कश्मीर की शोभा पर्यटकों का मन मोह लेती है।

## ➡ व्याकरणात्मक प्रश्न

**१. निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए—**
हिमगिरिरिति, हिमालयस्यैव, प्रहरीव, तरवश्च, महोच्चानि।

**२. निम्नलिखित शब्दों में विभक्ति और वचन बताइए—**
शिखराणि, हिमै:, उत्तरस्याम्, भारतीयान्, भूभागे।

## शब्दार्थ

**नाम्नाभिधीयते** (नाम्ना + अभिधीयते) = नाम से पुकारा जाता है। **हिमगिरिरित्यपि** = (हिमगिरि: + इति + अपि) = हिमगिरि भी। **उत्तरसीम्नि** = उत्तरी सीमा पर। **उपत्यका** = घाटी। **अधित्यका** = पहाड़ का ऊपरी मध्य भाग। **प्रान्तरे** = अन्तर्वर्ती भू-भाग में। **पुनन्ति** = पवित्र बनाते हैं। **आमयेभ्य:** = रोगों से। **एभ्योऽपि** = इनके भी। **आसन्द्यादि** = गद्दीदार आराम कुर्सी आदि। **धिया** = बुद्धि से। **सुतरां समादृत:** = अत्यन्त आदर प्राप्त। **उपह्वरे** = गुफा में। **विप्रोऽजायत** = (विप्र: + अजायत) ब्राह्मण हुए। **प्रदातु:** = प्रदान करनेवाले। **सर्वसिद्धिप्रदातृतया** = समस्त सिद्धियों को प्रदान करने के कारण। **सुतराम्** = अत्यन्त। **समादृत:** = आदर पानेवाला। **पर्वतराजोऽयम्** (पर्वतराज: + अयम्) यह पर्वतराज। **सर्वौषधिभि:** = (सर्व+ओषधिभि:) सभी ओषधियों से।

●●

## पञ्चमः पाठः

# गीतामृतम्

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः।।१।।

क्लैव्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।२।।

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः।।३।।

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति।।४।।

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते।।५।।

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा–
न्यन्यानि संयाति नवानि देही।।६।।

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः।।७।।

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।।८।।

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ! लभन्ते युद्धमीदृशम्।।९।।

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय! युद्धाय कृतनिश्चयः।।१०।।

(श्रीमद्भगवद्गीता)

# अभ्यास प्रश्न

## ➡ लघु उत्तरीय प्रश्न

१. विषादमापन्नमर्जुनं श्रीकृष्णः किम् उपादिशत्?
२. स कः यं न शस्त्राणि छिन्दन्ति, न पावकः दहति?
३. कः न हन्ति न च हन्यते?
४. देही जीर्णानि शरीराणि विहाय किम् करोति?
५. पण्डिताः कान् नानुशोचन्ति?
*अथवा* के गतासूनगतासूंश्च नानुशोचन्ति?
६. आत्मा अमरः इति कस्योपदेशः अस्ति?
७. सुखिनः क्षत्रियाः किम् लभन्ते?
८. शस्त्राणि कं न छिन्दन्ति?
९. कः आत्मानः न दहति?

## ➡ अनुवादात्मक प्रश्न

**१. निम्नलिखित श्लोकों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) तं तथा ......................................... मधुसूदनः।
(ख) देहिनोऽस्मिन्.................................... न मुह्यति।
(ग) वासांसि जीर्णानि ............................. नवानि देही।
(घ) नैनं ......................................... शोचितुमर्हसि।
(ङ) हतो वा....................................... कृतनिश्चयः।
(च) अशोच्यानन्वशोचस्त्वं .......................... पण्डिताः।
(छ) क्लैव्यं मा........................................... परन्तप।
(ज) यदृच्छया..................................... युद्धमीदृशम्।
(झ) य एनं वेत्ति .............................. हन्ति न हन्यते।
(ञ) जातस्य हि.................................. शोचितुमर्हसि।

**२. निम्नलिखित सूक्तिपरक वाक्यों की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः।
(ख) नायं हन्ति न हन्यते।
(ग) जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
(घ) तस्मादुत्तिष्ठ कौन्तेय!
(ङ) नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।

**३. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) यह तेरे लिए उचित नहीं है।

(ख) अर्जुन युद्ध करो।

(ग) आत्मा को अग्नि नहीं जला सकती।

(घ) मृत व्यक्ति का जन्म निश्चित है।

(ङ) तुझे शोक नहीं करना चाहिए।

## ➡ व्याकरणात्मक प्रश्न

**१. अधोलिखित शब्दों में सन्धि-विच्छेद कीजिए–**

कृपयाविष्टम्, नैतत्, चोपपन्नम्, त्यक्त्वोत्तिष्ठ।

**२. अधोलिखित शब्दों में विभक्ति एवं वचन बताइए–**

एनम्, युद्धाय, वासांसि, जातस्य।

**३. अधोलिखित क्रिया-पदों में धातु एवं लकार बताइए–**

उत्तिष्ठ, वेत्ति, हन्ति, प्राप्स्यसि, गृह्णाति।

## शब्दार्थ

**कृपयाविष्टम्** = (कृपया + आविष्टम्) करुणा से पूर्ण। **अश्रुपूर्णाकुलेक्षणम्** = (अश्रुपूर्ण + आकुल + ईक्षणम्) आँसुओं से भरे हुए व्याकुल नेत्रोंवाले। **विषीदन्तम्** = दुःखी होते हुए। **मधुसूदनः** = श्रीकृष्ण। **क्लैव्यं** = नपुंसकता को। **नैतत्वय्युपपद्यते** = न + एतत् + त्वयि + उपपद्यते = यह तुम्हारे लिए उचित नहीं है। **क्लैव्यम्** = कायरता को। **पण्डिताः** = ज्ञानी, विद्वान्। **जरा** = वृद्धावस्था। **विहाय** = छोड़कर। **देही** = आत्मा। **यदृच्छया** = स्वेच्छा से। **चोपपन्नम्** = च + उपपन्नम् = और प्राप्त हुए। **अपावृतम्** = खुला हुआ। **सुखिनः** = भाग्यवान्। **युद्धमीदृशम्** = (युद्धम् + ईदृशम्) ऐसे युद्ध की। **हतो वा** = (हतः + वा) मरकर या। **प्राप्स्यसि** = तू प्राप्त करेगा। **भोक्ष्यसे** = तू भोगेगा। **तस्मादुत्तिष्ठ** = (तस्मात् + उत्तिष्ठ) इसलिए तू उठ खड़ा हो। **कौन्तेय** = हे कुन्ती-पुत्र (अर्जुन)!

●●

## षष्ठः पाठः

# चरैवेति-चरैवेति

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।।१।।

देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकँसुचरितानि। तानि त्वयोपास्यानि नो इतराणि।।२।।

ये के चास्मच्छ्रेयाँसोब्राह्मणाः। तेषां त्वयासनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम् भिया देयम्। संविदा देयम्। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ।।३।।

ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम् ।।४।।

## अभ्यास प्रश्न

### ➡ लघु उत्तरीय प्रश्न

१. आचार्यः अन्तेवासिनं किं उपदिशति?
२. स्वाध्यायात् किम् न कुर्यात्?
३. सत्यात् च धर्मात् किम् न कुर्यात्?
४. आचार्यस्य आदेशः कस्य तुल्यः भवति?
५. कस्मात् कस्मात् न प्रमदितव्यम्?
६. सत्य भाषणे किम् न कुर्यात्?
७. पिता कस्य तुल्यः भवति?

### ➡ अनुवादात्मक प्रश्न

**१. अधोलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति............................. न प्रमदितव्यम्।
(ख) देवपितृकार्याभ्यां न प्रमदितव्यम्........................... तानि त्वयोपास्यानि।
(ग) नो इतराणि ............................................ वृत्तविचिकित्सा वा स्यात्।
(घ) ये तत्र ब्राह्मणाः संमर्शिनः .................................. एवमु चैतदुपास्यम्।

**२. अधोलिखित सूक्तिपरक पंक्तियों की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमादः।
(ख) मातृ देवो भव, पितृ देवो भव, आचार्य देवो भव अतिथि देवो भव।

(ग) श्रद्धया देयम्, ह्रिया देयम्, भिया देयम्, संविदा देयम्।
(घ) एतदनुशासनम्।

३. **अधोलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**
(क) तुम सत्य बोलो और धर्म का आचरण करो।
(ख) स्वाध्याय में प्रमाद मत करना।
(ग) सत्य भाषण में प्रमाद नहीं करना चाहिए।
(घ) श्रद्धापूर्वक दान करना चाहिए।
(ङ) आचार्य का आदेश वेदवाक्य के समान होता है।

## ➡ व्याकरणात्मक प्रश्न

१. **अधोलिखित क्रियापदों में धातु एवं लकार बताइए–**
आगमिष्यति, गच्छाम:, भवन्ति।
२. **निम्नलिखित शब्दों में प्रत्यय बताइए–**
प्रदितव्यम्, गत्वा, गृहीत्वा, नीत्वा, मन्त्रयित्वा।
३. **अधोलिखित में सन्धि विच्छेद कीजिए–**
सत्यान्न, धर्मान्न, यान्यनवद्यानि, यान्यस्माकम्, त्वयोपास्यानि।

## शब्दार्थ

**वेदम्** = वेद को। **अनूच्य** = कहकर, उच्चारण करके। **अन्तेवासिनम्** = शिष्य को। **अनुशास्ति** = उपदेश देता है। **सत्यं वद** = सत्य बोलो। **धर्मं चर** = धर्म का आचरण करो। **स्वाध्यायात्** = स्वाध्याय से। **मा** = नहीं। **आचार्याय** = आचार्य के लिए। **प्रियम्** = प्यारा। **धनमाहृत्य** = धन भेंट करके। **प्रजातन्तुम्** = सन्तान की परम्परा को। **व्यवच्छेत्सीः** = नष्ट करो। **सत्यान्न** = सत्य से नहीं। **प्रमदितव्यम्** = प्रमाद करना चाहिए। **धर्मान्न** = धर्म से नहीं। **कुशलान्न** = कुशल से नहीं। **भूत्यै** = उन्नति के साधनों के विषय में। **स्वाध्यायप्रवचनाभ्याम्** = वेदों के अध्ययन और अध्यापन में। **देवपितृ कार्याभ्याम्** = देवों तथा पितरों से सम्बन्धित कर्मों में। **मातृदेवः** = माता को देव समझने वाले। **भव** = होओ, बनो। **पितृदेवः** = पिता को देव समझने वाले। **आचार्य देवः** = आचार्य में देवता की भावना रखने वाले। **अतिथि देवः** = अतिथि को देवता मानने वाले। **यान्यनवद्यानि** = जो प्रशंसनीय, श्रेष्ठ। **तानि** = वे। **सेवितव्यानि** = सेवन करने चाहिए। **इतराणि** = अन्य। **अस्मच्छ्रेयाः** = हमसे श्रेष्ठ। **श्रद्धया** = श्रद्धा की भावना से। **श्रिया** = अपनी सम्पत्ति के अनुसार। **ह्रिया** = लज्जा के अनुसार। **भिया** = भय के कारण। **संविदा** = मित्रता की भावना से। **कर्मविचिकित्सा** = किसी कर्म के विषय में सन्देह। **वृत्तविचिकित्सा** = किसी आचरण के सम्बन्ध में सन्देह। **सम्मर्शिनः** = विवेकशील। **आयुक्ताः** = स्वेच्छा से काम करने वाला। **अलूक्षा** = सरल स्वभाव के। **वर्तेथाः** = व्यवहार करना। **अथाभ्याख्यातेषु** = जो आरोपित है। **एषः** = यह। **आदेशः** = आदेश है। **वेदोपनिषत्** = वेदों का रहस्य, वेदों की शिक्षा। **एतदनुशासनम्** = यही अनुशासन है। **एवमुपासितव्यम्** = इसी प्रकार तुम्हें उपासना करनी चाहिए।

●●

## सप्तमः पाठः

# लोभः पापस्य कारणम्

एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते। भोः भोः पान्थाः! इदं सुवर्ण-कङ्कणं गृह्यताम्। ततो लोभाकृष्टेन केनचित् पान्थेनालोचितम्– भाग्येनैतत् संभवति किन्तु अस्मिन् आत्मसन्देहे प्रवृत्तिनं विधेया। यतः–

**न संशयमनारुह्य नरो भद्राणि पश्यति।**
**संशयं पुनरारुह्य यदि जीवति पश्यति।।**

स आह– कुत्र तव कङ्कणम्? व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत्– कथं मारात्मके त्वयि विश्वासः। व्याघ्र उवाच– शृणु रे पान्थ! प्रागेव यौवनदशायाहमतीव दुर्वृत्त आसम्। अनेकगोमानुषाणां बधान्मे पुत्रा मृताः दाराश्च वंशहीनश्चाहम्। ततः केनचिद् धार्मिकेणाहमादिष्टः– दानधर्मादिकं चरतु भवान्। तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो न कथं विश्वासभूमिः। मम चैतावान् लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मैकस्मैचिद् दातुमिच्छामि। तथापि व्याघ्रो मानुषं खादति इति लोकप्रवादो दुर्निवारः। मया च धर्मशास्त्राणि अधीतानि–

**मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा।**
**दरिद्रे दीयते दानं सफलं पाण्डुनन्दन।।**
**मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।।**

त्वं चातीव दुर्गतः तत्तुभ्यं सुवर्णकङ्कणं दातुं सयत्नोऽहम्। यतः–

**दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्।**
**व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः।।**

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण। ततो यावदसौ तद्वचः प्रतीतो लोभात् सरः स्नातुं प्रविशति तावत् महापङ्के निमग्नः पलायितुमक्षमः। पङ्के पतित दृष्ट्वा व्याघ्रोऽवदत्–अहह! महापङ्के पतितोऽसि। अतस्त्वामहमुत्थापयामि इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण भक्षितः। **(हितोपदेश)**

## अभ्यास प्रश्न

### ➡ लघु उत्तरीय प्रश्न

१. लोभः कस्य कारणम् अस्ति?
२. व्याघ्रो हस्तं प्रसार्य पान्थं किमदर्शयत्?
३. व्याघ्रस्य वचनं श्रुत्वा पथिकः किम् अचिन्तयत्?
४. पान्थं पङ्के पतितं दृष्ट्वा व्याघ्रः किम् अवदत्?
५. दानं कस्मै दातव्यम्?
६. पापस्य किम् कारणम् अस्ति?
७. व्याघ्रे यौवने कीदृशः आसीत्?
८. व्याघ्रस्य सम्बन्धे कः लोकप्रवादः?
९. सः पथिकः केन भक्षितः?
१०. पण्डितः कः भवति?

## ➡ अनुवादात्मक प्रश्न

**१. अधोलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) शृणु रे पान्थ! व्याघ्र उवाच– ..................... दातुमिच्छामि।
(ख) मरुस्थल्यां ................................................ पण्डितः।
(ग) त्वं चातीव................................................किमौषधैः।
(घ) तदत्र सरसि ................................................ भक्षितः।
(ङ) मातृवत् ................................................ स पण्डितः।

**२. अधोलिखित सूक्तिपरक पंक्तियों की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) न संशयमनारुह्य नरो भद्राणि पश्यति।
(ख) मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।
(ग) दरिद्रे दीयते दानं सफलं पाण्डुनन्दन।
(घ) आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।
(ङ) व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः।
(च) लोभः पापस्य कारणम्।

**३. अधोलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) लोभ पाप का कारण होता है।
(ख) दरिद्र को दान देना चाहिए।
(ग) तेरा कंगन कहाँ है?
(घ) धनवान् को धन मत दो।

## ➡ व्याकरणात्मक प्रश्न

**१. निम्नलिखित में सन्धि-विच्छेद कीजिए–**
पान्थोऽवदत्, लोभाकृष्टः, चैतावान्।

**२. निम्नलिखित में विभक्तियाँ बताइए–**
भाग्येन, सन्देहे, उपदेशात्, व्याघ्रः।

**३. निम्नलिखित क्रियापदों में धातु, पुरुष एवं वचन बताइए–**
अपश्यन्, पश्यति, तिष्ठति, इच्छामि।

## शब्दार्थ

**स्नातः** = स्नान करके। **कुशहस्तः** = हाथ में कुशा लिये हुए। **पान्थाः** = हे पथिकों। **पान्थेनालोचितम्** = (पान्थेन + आलोचितम्) पथिक ने सोचा। **भाग्येनैतत्** = (भाग्येन + एतत्) भाग्य से यह। **अनारुह्य** = बिना चढ़े हुए। **पुनरारुह्य** = (पुनः + आरुह्य) फिर चढ़कर, फिर प्राप्त करके। **प्रसार्य** = फैलाकर। **मारात्मके त्वयि** = हिंसा करनेवाले तुझ पर। **प्रागेव** = (प्राक् + एव) पहले ही। **दाराश्च** = (दाराः + च) और स्त्री। **धार्मिकेणाहमादिष्टः** = (धार्मिकेण + अहम् + आदिष्टः) धार्मिक ने मुझे आदेश दिया। **तदुपदेशादिदानीमहम्** = (तद् + उपदेशात् + इदानीम् + अहम्) उसके उपदेश से अब मैं। **गलितनखदन्तः** = गिरे हुए नाखून और दाँतोंवाला। **लोकप्रवादः** = लोकनिन्दा। **दुर्निवारः** = नहीं हट सकती। **मा** = मत (नहीं)। **प्रयच्छेश्वरे** = (प्रयच्छ + ईश्वरे) समर्थ को दो। **व्याधितस्य** = रोगी की। **नीरुजस्य** = नीरोगी की। **पङ्के** = कीचड़ में। **निमग्नः** = फँसा हुआ। **पलायितुमक्षमः** = (पलायितुम् + अक्षमः) भागने में असमर्थ। **अतस्त्वामहमुत्थापयामि** = (अतः + त्वाम् + अहम् + उत्थापयामि) इसलिए तुझे मैं निकालता हूँ। **मारात्मक** = हिंसक। **दुर्वृत्तः** = दुराचारी। **प्रतीतः** = विश्वास करके। **शनैः-शनैः** = धीरे-धीरे। **उपगम्य** = पास जाकर।

●●

## अष्टमः पाठः

# विश्ववन्द्याः कवयः

**वाल्मीकिः**

**कवीन्दुं नौमि वाल्मीकिं यस्य रामायणीं कथाम्।**
**चन्द्रिकामिव चिन्वन्ति चकोरा इव कोविदाः।।**
**वाल्मीकिकविसिंहस्य कवितावनचारिणः।**
**श्रृण्वन् राम-कथा-नादं को न याति परं पदम्।**
**कूजन्तं रामरामेति मधुरं मधुराक्षरम्।**
**आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्।।**

**व्यासः**

**श्रवणाञ्जलिपुटपेयं विरचितवान् भारताख्यममृतं यः।**
**तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे।।**
**नमः सर्वविदे तस्मै व्यासाय कविवेधसे।**
**चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम्।।**
**नमोस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र।**
**येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः।।**

**कालिदासः**

**पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासः।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव।।**
**कालिदासगिरां सारं कालिदासः सरस्वती।**
**चतुर्मुखोऽथवा ब्रह्मा विदुर्नान्ये तु मादृशाः।।**
**निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।**
**प्रीतिर्मधुरसान्द्रासु मंजरीष्विव जायते।।**

**(संकलित)**

# अभ्यास प्रश्न

## ➡ लघु उत्तरीय प्रश्न

१. संस्कृत साहित्यस्य आदिकविः कः आसीत्?
*अथवा* संस्कृत आदिकवेः नाम लिखत।
२. वाल्मीकिः कः आसीत्?
३. कालिदासः कथं प्रसिद्ध अस्ति?
४. विश्ववन्द्याः कवयः के के सन्ति?
५. कवीनां गणनाप्रसङ्गे कालिदासः कुत्राधिष्ठितः आसीत्?

६. कालिदासस्य सूक्तीनां का विशेषता?
७. कालिदासस्य त्रयाणाम् ग्रन्थानां नामानि लिख।
८. क: कवि: कवीन्दु: इति कथित:।
९. क: कवि: महाभारतम् विरचितवान्?
१०. व्यास: किं रचितवान्?

## ➡ अनुवादात्मक प्रश्न

**१. निम्नलिखित श्लोकों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) कवीन्दुं नौमि .................................... कोविदा:।
(ख) वाल्मीकिकविसिंहस्य ........................... परं पदम्।
(ग) कूजन्तम्......................................... कोकिलम्।
(घ) नम: सर्वविदे ..................................... भारतम्।
(ङ) पुरा कवीनां ......................................... बभूव।
(च) कालिदासगिरां ................................ तु मादृशा:।
(छ) निर्गतासु ............................................जायते।

**२. निम्नलिखित सूक्तिपरक वाक्यों की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) शृण्वन् राम-कथा-नादं को न याति परं पदम्।
(ख) अनामिका सार्थवती बभूव।
(ग) पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठित कालिदास:।
(घ) प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते।
(ङ) प्रज्वालितो ज्ञानमय: प्रदीप:।
(च) चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम्।

**३. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) वाल्मीकि संस्कृत साहित्य के आदिकवि थे।
(ख) रामायण के रचयिता वाल्मीकि थे।
(ग) सदा सत्य बोलना चाहिए।

## ➡ व्याकरणात्मक प्रश्न

**१. निम्नलिखित में सन्धि-विच्छेद कीजिए–**

कवीन्दुम्, भारताख्यम्, मधुराक्षरम्, कनिष्ठिकाधिष्ठित:, कवेरभावात्।

**२. निम्नलिखित पदों में विभक्ति बताइए–**

सर्वविदे, सरस्वत्या:, वनचारिण:, त्वया, कवे:, सूक्तिषु।

## शब्दार्थ

**कवीन्दुम्** = (कवि + इन्दुम्) कविरूपी चन्द्रमा को। **चन्द्रिकामिव** = (चन्द्रिकाम् + इव) चाँदनी के समान। **कोविदा:** = विद्वान्। **आरुह्य** = चढ़कर। **कूजन्तम्** = कूजन करते हुए। **रामरामेति** = (राम-राम + इति) 'राम-राम' इस (शब्द) का। **कविताशाखाम्** = कवितारूपी शाखा पर। **वाल्मीकिकोकिलम्** = वाल्मीकिरूपी कोयल की। **श्रवणाञ्जलिपुटपेयम्** = (श्रवण + अञ्जलि-पुट-पेयम्) कानरूपी अञ्जलि के पुट से पीने-योग्य। **तमहमरागमकृष्णम्** = (तम् + अहम् + अरागम् + अकृष्णम्) उन रागरहित और पापरहित को मैं। **मादृशा:** = मुझ जैसे। **प्रीतिर्मधुरसान्द्रासु** = (प्रीति: + मधुर-सान्द्रासु) **प्रीति:** = आनन्द। **मधुर-सान्द्रासु** = मधुर और सघन।

●●

# नवमः पाठः

# चतुरश्चौरः

आसीत् काञ्ची नाम राजधानी। तत्र सुप्रतापो नाम राजा। तत्रैकदा कस्यापि धनिकस्य धनं चोरयन्तश्चत्वारश्चौराः सन्धिद्वारि प्रशास्तृपुरुषैः शृङ्खलया बद्ध्वा राज्ञे निवेदिताः राजा च घातकपुरुषानादिष्टवान्– रे घातकपुरुषाः! इमान् नीत्वा मारयत। यतः–

**संवर्द्धनञ्च साधूनां दुष्टानाञ्च विमर्दनम्।**
**राजधर्मं बुधा प्राहुर्दण्डनीति-विचक्षणाः।।**

ततो राजाज्ञया त्रयश्चौराः शूलमारोप्य हताः। चतुर्थेन चिन्तितम्–

**प्रत्यासन्नेऽपि मरणे रक्षोपायो विधीयते।**
**उपाये सफले रक्षा निष्फले नाधिकं मृतेः।।**
**व्याधिना पीड्यमानोऽपि मार्यमाणोऽपि भूभुजा।**
**प्रत्यायाति यमद्वारात् प्रतीकारपरो नरः।।**

चौरोऽवदत्– रे रे घातकपुरुषाः! त्रयश्चौराः युष्माभिर्हता एव राजाज्ञया, मां तु राजसन्निधानं कृत्वा मारयत। यतोऽहमेकां महतीं विद्यां जानामि। मयि मृते सा विद्या अस्तं यास्यति। राजा तु तां गृहीत्वा मां मारयतु, येन सा विद्या मर्त्यलोके तिष्ठतु।

घातका अब्रूवन्– रे चौर! पापपुरुषाधम! वधस्थानमानीतोऽसि। किमपरं जीवितुमिच्छसि? कां विद्यां जानासि? कथं वा तवाधमस्य विद्या भूपालेन पूजयितव्या? चौरोऽवदत्–रे घातकाः? किं ब्रूथ? राजकार्ये विघ्नं कर्तुमिच्छथ? यूयं गत्वा निवेदयत, यदि राजा ज्ञातुमिच्छति तां विद्यां तदा गृह्णातु। कथं सा विद्या युष्मभ्यं मया दातव्या।

ततश्चौरस्य वचनैः राजकार्यानुरोधेन च सा वार्ता तैः राज्ञे निवेदिता। राजा च सकौतुकं चौरमाहूय अपृच्छत्– रे चौर! कां विद्यां जानासि? चौरोऽवदत्–देव! सर्षपपरिमाणानि सुवर्णबीजानि कृत्वा भूमौ उप्यन्ते मासमात्रेणैव च कन्दल्यो भवन्ति पुष्पाणि च। तानि पुष्पाणि सुवर्णान्येव भवन्ति। रक्तिकामात्रेण बीजेन पलसंख्याकानि भवन्ति। तद् देवः प्रत्यक्षं पश्यतु। राजाऽवदत्– चौर! सत्यमेतत्? चौरोऽवदत्–देवस्य पुरतः कस्यासत्यभाषणे शक्तिः। यदि मम वचनं व्यभिचरितं तदा मासान्ते ममाप्यन्तो भविष्यति। राजाऽवदत्–भद्र! वप सुवर्णम्।

ततश्चौरः सुवर्णं दाहयित्वा सर्षपमात्राणि बीजानि कृत्वा, राजान्तःपुरक्रीडासरस्तीरे परमनिगूढस्थाने भूपरिष्कारं कृत्वा अभाषत्–देव! क्षेत्र-बीजे सम्पन्ने, वप्ता कश्चिद् दीयताम्। राजाऽवदत्– त्वमेव किं न वपसि? चौरोऽवदत्— महाराज! यदि सुवर्णवपने एव ममाधिकारो भवेत् तदानया विद्यया कथमहं दुःखी भवामि। किन्तु चौरस्य सुवर्णवपनाधिकारो नास्ति। येन कदापि किमपि न चोरितं स वपतु। देव एव किं न वपति?

राजाऽवदत्– मया चारणेभ्यो दातुं तातचरणानां धनं चोरितम्। चौरोऽवदत्– तर्हि मन्त्रिणो वपन्तु। मन्त्रिणोऽवदन्– वयं राजोपजीविनः कथमस्तेयिनो भवामः। चौरोऽवदत्– तर्हि धर्माधिकारी वपतु। धर्माध्यक्षोऽकथयत्– मया बाल्यदशायां मातुर्मोदकाश्चोरिताः।

चौरोऽवदत्–यदि यूयं सर्वेऽपि चौराः कथमहमेको मारणीयोऽस्मि। तच्चौरवचनं श्रुत्वा सभासदः सर्वे हसितवन्तः। राजापि हास्यरसापनीतक्रोधो विहस्याकथयत्– रे चौर! न मारणीयोऽसि। हे मन्त्रिणः! कुबुद्धिरपि बुद्धिमानयं चौरो हास्यरसप्रवीणश्चः। ततो ममैव सन्निधाने तिष्ठतु, प्रस्तावे मां हासयतु खेलयतु च। इत्युक्त्वा स चौरः राजा स्वसन्निधाने धृतः।

**न चौरादधमः कश्चित् स च हासेन विद्यया।**
**मृत्यु-पाशं समुच्छिद्य राज्ञो वल्लभतां गतः।।**

**(पुरुषपरीक्षा)**

# अभ्यास प्रश्न

## ➡ लघु उत्तरीय प्रश्न

१. राज्ञः सुप्रतापस्य राजधानी का आसीत्?
२. चौराः किम् अचोरयन्?
३. काञ्ची कस्य राज्ञः राजधानी आसीत्?
४. चौरः मृत्युपाशात् कथं विमुक्तः?
५. राजा कस्य धनं चोरितमासीत्?
६. सुवर्णस्य वपने कस्य अधिकारः नास्ति?
७. सुवर्णस्य वपने कस्य अधिकारः?
८. कीदृशः नरः यमद्वारात् प्रत्यायाति?
९. राजा सकौतुकम् चौरमाहूय किमपृच्छत्?
१०. कः अवदत्– यदि यूयं सर्वेऽपि चौराः कथमहमेको मारणीयोऽस्मि?

## ➡ अनुवादात्मक प्रश्न

**१. निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) संवर्द्धनञ्च ..................................... विचक्षणाः।
(ख) देव ............................................ वप सुवर्णम्।
*अथवा* ततश्चौरस्य वचनैः.......................... वप सुवर्णम्।
(ग) प्रत्यासन्नेपि............................................ नरः।
(घ) घातका ........................................... दातव्या।
(ङ) ततश्चौरः सुवर्णं ................................... वपति।
(च) चौरोऽवदत्........................................... धृतः।

**२. निम्नलिखित सूक्तिपरक वाक्यों की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) प्रत्यासन्नेऽपि मरणे रक्षोपायो विधीयते।
*अथवा* उपाये सफले रक्षा निष्फले नाधिकं मृतेः।
(ख) प्रत्यायाति यमद्वारात् प्रतीकारपरो नरः।
(ग) न चौरादधमः कश्चित्।
(घ) राजधर्मं बुधा प्राहुर्दण्ड नीति–विचक्षणाः।

**३. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) चोरों ने धनिक का धन चुराया।
(ख) राजपुरुषों ने उन्हें पकड़ लिया।
(ग) राजा ने उन्हें मृत्यु-दण्ड दिया।

## ➡ व्याकरणात्मक प्रश्न

१. **निम्नलिखित में सन्धि-विच्छेद कीजिए–**
तत्रैकदा, राजाज्ञया, रक्षोपायः, चौरोऽवदत्।

२. **निम्नलिखित शब्दों में मूल शब्द, विभक्ति एवं वचन बताइए–**
साधूनाम्, चतुर्थेन, युष्माभिः, राज्ञे, मृतेः।

३. **निम्नलिखित में धातु, लकार, पुरुष एवं वचन बताइए–**
मारयत, अपृच्छत्, वपन्तु।

## शब्दार्थ

**तत्रैकदा** = (तत्र + एकदा) वहाँ एक बार। **सन्धिद्वारि** = सेंध के द्वार पर। **विमर्दनम्** = दण्ड देना। **मृतेः** = मृत्यु से। **भूभुजा** = राजा द्वारा। **सकौतुकम्** = कौतूहल के साथ। **उप्यन्ते** = बोये जाते हैं। **पुरतः** = सामने। **व्यभिचरितम्** = गलत। **वप्ता** = बोनेवाला। **तच्चौरवचनम्** = (तत् + चौरवचनम्) चोर के उस वचन को। **हास्यरसापनीतक्रोधः** = (हास्य-रस + अपनीत + क्रोधः) हास्य रस से क्रोध दूर होने पर। **प्रस्तावे** = समय-समय पर, अवसर पर। **धृतः** = रख लिया। **समुच्छिद्य** = काटकर। **वल्लभतां गतः** = प्रिय हो गया।

●●

## दशमः पाठः

# सुभाषचन्द्रः

सप्तनवत्युत्तराष्टादशशततमेऽब्दे (१८९७) जनवरी मासस्य त्रयोविंशतितिथौ श्रीसुभाषः स्वजन्मना बङ्गभुवमलञ्चकार। अस्य पिता जानकीनाथवसुः राजकीय-प्राड्विवाकः आसीत्। सुभाषः बाल्यादेव बुद्धिमान्, धीरः, साहसी, प्रतिभासम्पन्नश्चासीत्। अयं कलिकातानगर्यां शिक्षां प्राप्य सम्मानिताम् आई० ए० एस० परीक्षामुत्तीर्यापि विदेशीयशासनस्य भृत्यत्वं न स्वीकृतवान्।

आङ्ग्लशासकानां भारते नाधिकारः, ते विदेशीयाः कथमत्र शासनं कुर्वन्ति इति चिन्तापरोऽयं स्वप्रयत्नेन भारतवर्षस्य स्वातन्त्र्यार्थं बहून् भारतीयान् स्वपक्षे अकरोत्। एवं विधेभ्यः अस्योग्रविचारेभ्यः भीताः आङ्ग्लशासकाः इमं पुनः पुनः कारागारे अक्षिपन् परं वीरोऽयं स्वातन्त्र्यार्थं स्वप्रयासं नात्यजत्।

सप्तत्रिंशदुत्तरैकोनविंशतिशततमे (१९३७) वर्षे त्रिपुरा कांग्रेसाधिवेशने अयं सर्वसम्मत्या सभापतिः वृतः, अस्य सम्मानार्थञ्च पञ्चाशद्वृषभयुक्ते रथेऽस्य शोभायात्रा नागरिकैः सम्पादिता।

'अहिंसामात्रेण स्वातन्त्र्यप्राप्तेः प्रयासः कल्पनामात्रमेव' इति निश्चित्य सः क्रान्तिपक्षमङ्गीकृतवान्। अस्योग्रक्रान्तेः भीताः आङ्ग्लशासकाः पुनरिमं कलिकातानगर्यां कारागारे अक्षिपन्। कष्टकरमिमं वृत्तान्तं श्रुत्वा सुभाषानुरक्तानां भारतीयानां हृदयं व्यदीर्यत। एकदा रात्रौ निद्रावशीभूतेषु कारागारनिरीक्षकेषु वीरोऽयं सहसा समुत्थाय 'शठे शाठ्यं समाचरेत्' इति नीतिमनुसरन्, स्वेष्टसिद्धिं कामयमानश्च सिद्धिदात्रीं जगदम्बां संस्मृत्य कारागाराद् बहिर्गतः।

प्रातः सुभाषमनवलोक्य सर्वे कारागारनिरीक्षकाः आश्चर्यचकिता जाताः, भृशमन्विष्यापि ते प्राप्तुं नाशक्नुवन्। कारागाराद् बहिरागत्य सुभाषः वेषपरिवर्त्तनं विधाय पुरुषपुर (पेशावर) नगरमगच्छत्। तत्र उत्तमचन्द्रनाम्नः वणिजो गेहे कञ्चित् कालमवसत्। ततश्च आङ्लशासकैः अवधानपूर्वकं निरीक्षणे कृतेऽपि 'जियाउद्दीन' इति नाम्ना 'जर्मन' देशं गतः। तत्रत्यशासकेन हिटलर नामकेन सह मैत्रीं विधाय वायुयानेन जयपाणि (जापान) देशं गतः।

मलयदेशे स्वसङ्घटनकौशलेन 'आजाद हिन्द फौज' इत्याख्यां सेनां सङ्घटितवान्। अस्यास्मिन् सङ्घटने हिन्दुयवनादिसर्वसम्प्रदायावलम्बिनः राष्ट्रानुरागिणः वीरवराः सम्मिलिता आसन्। अस्य सङ्घटनस्य अभिवादनपदम् 'जय हिन्द' इति, उद्घोषश्च 'दिल्ली चलत' इत्यासीत्।

'यूयं मह्यं रक्तमर्पयत, अहं युष्मभ्यं स्वतन्त्रतां दास्यामि' इति रोमाञ्चकरः शब्दसमूहः सुभाषस्य मुखात् येनापि श्रुतः सः त्वरितमेव तेन सह स्वातन्त्र्यसंग्रामे सैनिकरूपेण अवतीर्णः। तस्मिन्नेव समये ब्रह्मदेशनिवासिनीभिः नारीभिः स्वभूषणैः सह सौभाग्यसूचकानि स्वर्णसूत्राण्यपि सुभाषचरणयोरर्पितानि।

'दिल्ली चलत, दिल्ली नातिदूरे वर्तते' इत्येतैः सुभाषस्य प्रोत्साहनवचनैः सैनिकाः दिल्लीं प्रति प्रस्थिताः। एतदन्तरे एव दुर्भाग्यवशात् जयपाणिदेशस्य पराजयात् सुभाषस्य सर्वे सैनिकाः आङ्लशासकैः बन्दीकृताः।

अस्य वीरवरस्य स्वातन्त्र्यप्राप्तेः कामना सप्तचत्वारिंशदुत्तरैकोनविंशतिशततमेऽब्दे (१९४७) अगस्तमासस्य पञ्चदशतिथौ पूर्णा जाता। अद्यास्माकं मध्येऽनुपस्थितोऽपि सुभाषः 'कीर्तिर्यस्य स जीवति' इत्युक्त्या सदैवामरः इति सुनिश्चितम्।

# अभ्यास प्रश्न

## ➡ लघु उत्तरीय प्रश्न

१. कारागाराद् बहिरागत्य सुभाषचन्द्र: वेषपरिवर्तनं विधाय कुत्रागच्छत्?
२. सुभाषस्य जन्म कुत्र अभवत्?
३. सुभाषस्य पितु: नाम किम् आसीत्?
४. सुभाषचन्द्रस्य सङ्घटनस्य किं नाम आसीत्?
*अथवा* सुभाषचन्द्र: मलयदेशे कां सेनां संघटितवान्?
५. सुभाषचन्द्रस्योग्रक्रान्ते भीता: आङ्गलशासका: किमकुर्वन्?
६. सुभाषचन्द्र: कं देशं स्वजन्मना अलंचकार?
७. सुभाषचन्द्र: कां नीतिम् अन्वसरत्?
८. सुभाषस्य सङ्घटनस्य उद्घोष: क: आसीत्?
*अथवा* कस्य उद्घोष: 'दिल्ली चलत' इति आसीत्?
९. आजाद-हिन्द-सेनां क: सङ्घटितवान्?
१०. आजाद-हिन्द-फौजस्य अभिवादन पदं किम् आसीत्?
११. सुभाषस्य क: रोमाञ्चकर: शब्दसमूह: आसीत्?
१२. सुभाषचन्द्र: केन नाम्ना जर्मनदेशं गत:?
१३. सुभाषचन्द्र: कस्यां नगर्यां शिक्षां प्राप्तवान्?
१४. सुभाषचन्द्र: कां सेनां सङ्घटितवान्?

## ➡ अनुवादात्मक प्रश्न

**१. निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए—**

(क) आङ्गलशासकानां .............................. नात्यजत्।
(ख) प्रात: सुभाषमनवलोक्य ........... 'जर्मन' देशं गत:।
(ग) अहिंसामात्रेण .................................... बहिर्गत:।
(घ) यूयं मह्यं .......................... सुभाषचरणयोरर्पितानि।
(ङ) यूयं मह्यं ......................................... प्रस्थिता:।
(च) दिल्ली चलत ................................. बन्दीकृता:।
अथवा अस्य वीरवरस्य ............................. सुनिश्चितम्।
(छ) सप्तनवत्युतराष्ट्र ......................... स्वपक्षे अकरोत्।

**२. निम्नलिखित पंक्तियों की ससन्दर्भ हिन्दी-व्याख्या कीजिए—**

(क) शठे शाठ्यं समाचरेत्।
(ख) यूयं मह्यं रक्तमर्पयत्, अहं युष्मभ्यं स्वतन्त्रतां दास्यामि।

(ग) कीर्तिर्यस्य स जीवति।

(घ) अहिंसामात्रेण स्वातंत्र्यप्राप्ते: प्रयास: कल्पनामात्रमेव।

(ङ) दिल्ली नातिदूरे वर्तते।

**३. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए—**

(क) श्री सुभाषचन्द्र साहसी व्यक्ति थे।

(ख) दिल्ली दूर नहीं है।

(ग) अहिंसा परम धर्म है।

## ➡ व्याकरणात्मक प्रश्न

**१. निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए—**

सूत्राण्यपि, परोऽयम्,अत्रैव।

**२. निम्नलिखित में सन्धि कीजिए—**

वीर: + अयम्। बहि: + गत:। तत: + च।

**३. निम्नलिखित में विभक्तियों का उल्लेख कीजिए—**

जन्मना, नगर्याम्, भारते, वृत्तान्तम्, रात्रौ।

## शब्दार्थ

**प्राड्विवाकः** = सरकारी वकील। **भृत्यत्वम्** = नौकरी। **वृत्तः** = चुने गये। **भीताः** = डरे हुए। **व्यदीर्यत** = फट गया। **कामयमानः** = चाहते हुए। **त्वरितमेव** = तुरन्त ही। **संस्मृत्य** = स्मरण करके। **बन्दीकृताः** = बन्दी बना लिये गये।

●●